श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीगोदास्तुतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीगोदास्तुतिः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीविष्णुचित्त कुल नन्दन कल्पवल्लीं
श्रीरङ्गराज हरिचन्दन योग दृश्याम्।
साक्षात् क्षमां करुणया कमलामिवान्यां
गोदामनन्यशरणः शरणं प्रपद्ये॥ १ ॥

वैदेशिकः श्रुति गिरामपि भूयसीनां
वर्णेषु माति महिमा न हि मादृशां ते।
इत्थं विदन्तमपि मां सहसैव गोदे
मौन द्रुहो मुखरयन्ति गुणास्त्वदीयाः॥ २ ॥

त्वत्प्रेयसः श्रवणयोरमृतायमानां
तुल्यां त्वदीय मणि नूपुर शिञ्जितानाम्।
गोदे त्वमेव जननि त्वदभिष्टवार्हां
वाचं प्रसन्न मधुरां मम संविधेयि॥ ३ ॥

कृष्णान्वयेन दधतीं यमुनानुभावं
तीर्थैर्यथावदवगाह्य सरस्वतीं ते।
गोदे विकस्वर धियां भवती कटाक्षात्
वाचः स्फुरन्ति मकरन्द मुचः कवीनाम्॥ ४ ॥

अस्मादृशामपकृतौ चिर दीक्षितानां
अह्नाय देवि दयते यदसौ मुकुन्दः।
तन्निश्चितं नियमितस्तव मौळि दाम्ना
तन्त्री निनादमधुरैश्च गिरां निगुम्भैः॥ ५ ॥

शोणाऽधरेऽपि कुचयोरपि तुङ्गभद्रा
वाचां प्रवाहनिवहेऽपि सरस्वती त्वम्।
अप्राकृतैरपि रसैर्विरजा स्वभावात्
गोदाऽपि देवि कमितुर्ननु नर्मदाऽसि॥ ६ ॥

वल्मीकतः श्रवणतो वसुधात्मनस्ते
जातो बभूव स मुनिः कवि सार्वभौमः।
गोदे किमद्भुतमिदं यदमी स्वदन्ते
वक्त्रारविन्द मकरन्द निभाः प्रबन्धाः॥ ७ ॥

भोक्तुं तव प्रियतमं भवतीव गोदे
भक्तिं निजां प्रणय भावनया गृणन्तः।
उच्चावचैर्विरह संगमजैरुदन्तैः
शृङ्गारयन्ति हृदयं गुरवस्त्वदीयाः॥ ८ ॥

मातः समुत्थितवतीमधि विष्णुचित्तं
विश्वोपजीव्यममृतं वचसा दुहानाम्।
तापच्छिदं हिम रुचेरिव मूर्तिमन्यां
सन्तः पयोधि दुहितुः सहजां विदुस्त्वाम्॥ ९ ॥

तातस्तु ते मधुभिदः स्तुति लेश वश्यात्
कर्णामृतैः स्तुति शतैरनवाप्त पूर्वम्।
त्वन्मौळि गन्ध सुभगामपहृत्य मालां
लेभे महत्तर पदानुगुणं प्रसादम्॥ १० ॥

दिक् दक्षिणाऽपि परि पक्त्रिम पुण्य लभ्यात्
सर्वोत्तरा भवति देवि तवावतारत्।
यत्रैव रङ्गपतिना बहुमान पूर्वं
निद्राळुनाऽपि नियतं निहिताः कटाक्षाः॥ ११ ॥

प्रायेण देवि भवती व्यपदेश योगात्
गोदावरी जगदिदं पयसा पुनीते।

यस्यां समेत्य समयेषु चिरं निवासात्
भागीरथी प्रभृतयोऽपि भवन्ति पुण्याः॥ १२ ॥

नागे शयः सुतनु पक्षिरथः कथं ते
जातः स्वयंवर पतिः पुरुषः पुराणः।
एवं विधाः समुचितं प्रणयं भवत्याः
संदर्शयन्ति परिहास गिरः सखीनाम्॥ १३ ॥

त्वद्भुक्त माल्य सुरभीकृत चारु मौळेः
हित्वा भुजान्तर गतामपि वैजयन्तीम्।
पत्युस्तवेश्वरि मिथः प्रतिघात लोलाः
बर्हातपत्र रुचिमारचयन्ति भृङ्गाः॥ १४ ॥

आमोदवत्यपि सदा हृदयं गमाऽपि
रागान्विताऽपि ललिताऽपि गुणोत्तराऽपि।
मौळि स्रजा तव मुकुन्द किरीट भाजा
गोदे भवत्यधरिता खलु वैजयन्ती॥ १५ ॥

त्वन्मौळि दामनि विभोः शिरसा गृहीते
स्वच्छन्दकल्पित सपीति रस प्रमोदाः।
मञ्जु स्वना मधु लिहो विदधुः स्वयं ते
स्वायंवरं कमपि मङ्गळ तूर्य घोषम्॥ १६ ॥

विश्वायमान रजसा कमलेन नाभौ
वक्षःस्थले च कमला स्तन चन्दनेन।
आमोदितोऽपि निगमैर्विभुरङ्घ्रि युग्मे
धत्ते नतेन शिरसा तव मौळि मालाम्॥ १७ ॥

चूडा पदेन परिगृह्य तवोत्तरीयं
मालामपि त्वदळकैरधिवास्य दत्ताम्।
प्रायेण रङ्गपतिरेष बिभर्ति गोदे
सौभाग्य संपदभिषेक महाधिकारम्॥ १८ ॥

तुङ्गैरकृत्रिम गिरः स्वयमुत्तमाङ्गैः
यं सर्वगन्ध इति सादरमुद्वहन्ति।
आमोदमन्यमधिगच्छति मालिकाभिः
सोऽपि त्वदीय कुटिलाळक वासिताभिः॥ १९ ॥

धन्ये समस्त जगतां पितुरुत्तमाङ्गे
त्वन्मौळिमाल्य भर संभरणेन भूयः।
इन्दीवर स्रजमिवादधति त्वदीयानि
आकेकराणि बहुमान विलोकितानि॥ २० ॥

रङ्गेश्वरस्य तव च प्रणयानुबन्धात्
अन्योन्य माल्य परिवृत्तिमभिष्टुवन्तः।
वाचालयन्ति वसुधे रसिकास्त्रिलोकीं
न्यूनाधिकत्व समता विषयैर्विवादैः॥ २१ ॥

दूर्वा दळ प्रतिमया तव देह कान्त्या
गोरोचना रुचिरया च रुचेन्दिरायाः।
आसीदनुज्झित शिखावळ कण्ठ शोभं
माङ्गळ्यदं प्रणमतां मधुवैरि गात्रम्॥ २२ ॥

अर्च्यं समर्च्य नियमैर्निगम प्रसूनैः
नाथं त्वया कमलया च समेयिवांसम्।
मातश्चिरं निरविशन् निजमाधिराज्यं
मान्या मनु प्रभृतयोऽपि महीक्षितस्ते॥ २३ ॥

आर्द्रापराधिनि जनेऽप्यभिरक्षणार्थं
रङ्गेश्वरस्य रमया विनिवेद्यमाने।
पार्श्वे परत्र भवती यदि तत्र नासीत्
प्रायेण देवि वदनं परिवर्तितं स्यात्॥ २४ ॥

गोदे गुणैरपनयन् प्रणतापराधान्
भ्रूक्षेप एव तव भोग रसानुकूलः।

कर्मानुबन्धि फल दान रतस्य भर्तुः
स्वातन्त्र्यदुर्व्यसन मर्म भिदा निदानम्॥ २५ ॥

रङ्गे तटिद्गुणवतो रमयैव गोदे
कृष्णाम्बुदस्य घटितां कृपया सुवृष्ट्या।
दौर्गत्य दुर्विष विनाश सुधा नदीं त्वां
सन्तःप्रपद्य शमयन्त्यचिरेण तापान्॥ २६ ॥

जातापराधमपि मामनुकम्प्य गोदे
गोप्त्री यदि त्वमसि युक्तमिदं भवत्याः।
वात्सल्य निर्भरतया जननी कुमारं
स्तन्येन वर्धयति दष्ट पयोधराऽपि॥ २७ ॥

शतमख मणि नीला चारु कल्हार हस्ता
स्तन भर नमिताङ्गी सान्द्र वात्सल्य सिन्धुः।
अळक विनिहिताभिः स्रग्भिराकृष्ट नाथा
विलसतु हृदि गोदा विष्णुचित्तात्मजा नः॥ २८ ॥

इति विकसित भक्तेरुत्थितां वेङ्कटेशात्
बहुगुण रमणीयां वक्ति गोदास्तुतिं यः।
स भवति बहुमान्यः श्रीमतो रङ्गभर्तुः
चरण कमल सेवां शाश्वतीमभ्युपैष्यन्॥ २९ ॥

॥ इति श्रीगोदास्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥